[1]उत्तीर्णम्-तीर्णः-तीर्णवान्, तारितः, तितरिषितः-तितरीषितः-तितीर्षितः-तवान्, तेतिरितः-तवान्;

तरः, [2]तेरिवान्, [3]सुतर्मा, [4]रथन्तरं (साम), तारः-तितरिषुः-तितरीषुः-[A]तितीर्षुः-तेतिरः;

तरितव्यम्-तरीतव्यम्, तारयितव्यम्, तितरिषितव्यम्-तितरीषितव्यम्-तितीर्षितव्यम्, तेतिरितव्यम्;

तरणीयम्, तारणीयम्, तितरिषणीयम्-तितरीषणीयम्-तितीर्षणीयम्, तेतिरणीयम्;

[5]तार्यम्, तार्यम्, तितरिष्यम्-तितरीष्यम्-तितीर्ष्यम्, तेतीर्यम्;

ईषत्तरः-दुस्तरः-सुतरः; — —

तीर्यमाणः, तार्यमाणः, तितरिष्यमाणः-तितरीष्यमाणः-तितीर्ष्यमाणः, तेतीर्यमाणः;

---

1. सनि विकल्पितेट्कत्वात् निष्ठायाम्, 'यस्य विभाषा' (7-2-15) इतीण्णिषेधे, इत्वे रपरत्वे, दीर्घे, 'रदाभ्यां निष्ठातो नः—' (8-2-42) इति निष्ठानत्वे, 'रषाभ्यां नो णः—' (8-4-1) इति णत्वे च रूपम्।

2. 'विभाषा पूर्वाह्णापराह्णाभ्याम्' (4-3-24) इत्यत्र भाष्ये 'पपुष आगतं पपिवद्रूप्यम्।' इति प्रयोगात् क्वसुर्लोकेऽपि क्वचिद्भवति। अस्य क्वसौ, 'तॄफलभजत्रपश्च' (6-4-122) इत्येत्वाभ्यासलोपयोः, 'वस्वेकाजाद्घसाम्' (7-2-67) इतीडागमे च रूपम्। 'छन्दस्युभयथा' (3-4-117) इत्यनेनास्य-सार्वधातुकसंज्ञायां तु 'ऋच्छत्यॄताम्' (7-4-11) इति गुणम्, एत्वाभ्यासलोपम्, इडागमं च बाधित्वा, तितीर्वान् इत्येव रूपमिति स्फुटं बृहच्छब्देन्दुशेखरे।

3. 'अन्येभ्योऽपि दृश्यन्ते' (3-2-75) इति मनिन्प्रत्ययः। 'नेड् वशि कृति' (7-2-8) इतीण्णिषेधः, गुणः।

4. 'संज्ञायां भृतॄ—' (3-2 46) इत्यादिना संज्ञायां खच्प्रत्ययः। रथन्तरं=साम। 'इह रथेन तरतीति व्युत्पत्तिमात्रं, न त्ववयवार्थानुगमः।' इति सि. कौमुदी। 'अरुर्द्विषदजन्तस्य—' (6-3-67) इति पूर्वपदस्य मुमागमः।
'विश्वम्भरा, साम रथन्तरं, स्वयं पतिंवरा चापि धनञ्जयश्च।
शत्रुंसहः कोऽपि वसुन्धरा च शत्रुंतपोऽरिन्दम एवमूह्यम्॥' इति प्र. सर्वस्वे।

5. 'ऋहलोर्ण्यत्' (3-1-124) इति ण्यत्।

A. 'तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥' रघुवंशे 1.2.